शेषचिन्तामणिविरचितस्य रसमञ्जरीपरिमलस्य

चिकित्सात्मकम् अध्ययनम्

(Critical edition and study of Rasamañjarīparimala of Śeṣacintāmaṇi)

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य

विद्यावारिधि इत्युपाधये

करिष्यमाणस्य शोधकार्यस्य शोधप्रस्तावसंक्षिप्तिका

शोधकर्ता

जिनेन्द्रः जम्बूः भिलवडे

मार्गदर्शकः

प्रो. परागः जोशी

संस्कृतभाषा-साहित्यविभागः

विभागाध्यक्षः – आधुनिकभाषाविभागः

संचालकः - शास्त्रविद्यागुरुकुलम्

संस्कृतभाषा-साहित्यविभागः

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः, रामटेकम् (महाराष्ट्रम्)

२०२२ – २०२३

शेषचिन्तामणिविरचितस्य रसमञ्जरीपरिमलस्य

चिकित्सात्मकम् अध्ययनम्

(Critical edition and study of Rasamañjarīparimala of Śeṣacintāmaṇi)

प्रास्ताविकम् –

"शब्दार्थयोर्यथावत्सहभावेन विद्या साहित्यविद्या"[१]

यत्र शब्दार्थयोः समानः सहभावः विद्यते सा साहित्यविद्या।
संस्कृतसाहित्ये नैकानि शास्त्राणि सन्ति, यानि स्वस्य अल्परचनायाऽपि प्रसिध्दानि वर्तन्ते।

भवति प्रथयन्नर्थं लीनं समभिप्लुतं स्फुटीकुर्वन् ॥
अल्पमनल्पं रचयन्ननल्पं व शास्त्रकविः ॥[२]

शास्त्रकविः गूढार्थं प्रकटयति, संदिग्धार्थं स्पष्टीकरोति, अल्पार्थं विस्तारयति एवञ्च विस्तृतार्थं लाघवेन निरूपयति। अलङ्कारशास्त्रे अनेके प्रसिद्धाः शास्त्रग्रन्थाः वर्तन्ते, तेषु अन्यतमः शास्त्रग्रन्थः रसमञ्जरी इति। अस्याः रसमञ्जर्याः रचयिता आचार्यः भानुदत्तः। अयं आचार्यः अनेकैः नामभिः अभिज्ञायते यथा भानुदत्तमिश्रः, भानुः, भानुकरः। अस्य कालः चतुर्दशशताब्दमिति स्वीक्रियते। रसमञ्जर्याः साम्प्रतमाहत्य एकादश टीकाः समुपलभ्यन्ते। श्रृङ्गाररसाधारेण नायक-नायिकयोः भेदनिरूपणम् इत्यस्य ग्रन्थस्य विषयः। विषयोऽयं स्वरचितैः उदाहरणैः सम्यकतया विवेचितः। ग्रन्थस्यास्य व्याख्यानाय नैकाः टीकाः रचिता सन्ति। यथा रसमञ्जरीपरिमलः, रसमञ्जरीप्रकाश, व्यङ्ग्यार्थकौमुदी, सुरभिव्याख्या इत्यादि।

विविधेषु टीकाकर्तृषु अन्यतमः टीकाकारः आचार्यः शेषचिन्तामणिः येन रसमञ्जरीपरिमलाख्या टीका विरचिता। आचार्यः अस्यां टीकायां स्वपरिचयं कारयति। बन्धपुरनिवासी अयं स्वरिचयं कारयति टीकायां यथा-

शेषावतंसश्रीशेषनृसिंहतनयःसुधीः।

स्वपरिचयात् परं आचार्यः स्वपितुः नामोल्लेखं करोति।
यथा-

"इतिसकलपण्डितघटाग्रणीयमछेशावंशानेकारभूतविद्वजनंवृदचूडामणिपीचिपिंजरीचरणयुगलकविशेषावतारश्रीमछेशनृसिंहतनयेनश्रीनृसिंहचरणोपासिनाबध्रपुरनिवासिनाश्रीशेषचिंतामणिनानिर्मितोरसमंजरीपरिमलःसमाप्तः॥"

रसमञ्जरीपरिमलटीकायाः हस्तलिखितानि पुण्यपत्तने आनन्दाश्रमः तथा भारतीय-इतिहास-संशोधन-मण्डलमित्यत्र कानिचन हस्तलिखितानि लब्धानि तथा च राजस्थानप्रदेशे महाराजमानसिंग-पुस्तक-प्रकाश-शोधकेन्द्रम्मेहरागढदुर्गः जोधपुरमित्यत्र हस्तलिखितमेकं प्राप्तम्। अस्मिन् शोधकार्ये एतासां प्राप्तटीकानां समीक्षणात्मकमध्ययनं सम्पादनञ्च क्रियते येन ग्रन्थस्यास्य गूढं तत्त्वं ज्ञातु सहृदयाः प्रभवेरन् तदर्थमयं शोधप्रस्तावः प्रस्तुयते। प्रथमं हस्तलिखितं महाराजा-मानसिंह-पुस्तक-प्रकाश-शोधकेन्द्रम्, जोधपुर, राजस्थान-प्रान्ते प्राप्तम्, हस्तलिखितेस्मिन् १०६ (Folios) पत्राणि सन्ति। द्वितीयं हस्तलिखितम् आनन्दाश्रम-संस्थान-पुणे इत्यत्र द्वे हस्तलिखिते प्राप्ते, हस्तलिखितेस्मिन् ८५/४२ पत्राणि सन्ति। भारतीय-इतिहास-संशोधन-मण्डल-पुणे इत्यत्र हस्तलिखितमेकम्, हस्तलिखितेस्मिन् ८१ पत्राणि सन्ति।

संशोधनविषयस्य आवश्यकता महत्वञ्च-

प्राचीनज्ञानस्य शोधः पुरातनहस्तलिखितमाध्यमेन भवति। तेभ्यः हस्तलिखितेभ्यः गूढज्ञानस्य अवबोधः भवति। प्रभूतानि हस्तलिखितानि संस्कृतभाषायां विरचितानि तेषु विविधानां शास्त्राणां विषयानाञ्च समावेशः वर्तते। पुरातनहस्तलिखितमाध्यमेन प्राचीनज्ञानस्य वर्तमानकाले उपादेयता इति संशोधनस्य मुख्योदिष्टम्। उपलब्धेयं टीका अलङ्कारशास्त्रस्य विद्यते तस्मात् अस्याः हस्तलिखितमाध्यमेन अलङ्कारशास्त्राय माहानाधारः भवेत्। तेन नूतनज्ञानमुपलभ्येत। अलङ्कारशास्त्राध्ययनाय अस्य महानुपयोगः भवेत् तथा च अनेन माध्यमेन पूर्ववर्तिनामाचार्यानां योगदानं व्यर्थं न स्यादिति हेतोरिदमध्ययनम्।

संशोधनस्य उद्दिष्टम्-

- चिकित्सात्मकपद्धत्या हस्तलिखितस्य सम्पादनम्।
- समीक्षणात्मकपद्धत्या हस्तलिखितस्य अध्ययनम्।
- रसमञ्जरीपरिमलगतस्य गूढज्ञानस्य प्रकाशनम्।
- संस्कृतभाषामाध्यमेन टीकायाः अध्ययनयोग्यता सम्पादनम्।
- प्राचीनहस्तलिखितानां प्रकाशनम्।
- टीकायाः समीक्षणात्मकपद्धत्या एवं तर्कशुद्धाध्ययनेन अलङ्कारशास्त्राध्ययनाय सरलतायाः सुलभतायाः सम्पादनम्।

शोधपद्धतिः –

- अस्मिन् संशोधने मुख्यतया पाठसमीक्षणपध्दया चिकिसात्मकमध्ययन करिष्यते। अपेक्षानुगुणं तुलनात्मकपध्दते समीक्षापध्दतेरपि अवलम्बः करिष्यते।

- तदर्थम् आदौ हस्तलिखितानां सङ्कलनं करिष्यते।
- चितानां हस्तलिखितानां पाठसमीक्षणं चिकित्सात्मकपद्धत्या करिष्यते।
- भानुदत्तरचितायाः रसमञ्जर्याः अन्यप्रकाशितटीकानामध्ययनं समीक्षणात्मकपद्धत्या तौलनिकपद्धत्या च करिष्यते।

सम्बन्धितपूर्वसंशोधनसाहित्यपरामर्शः –

रसमञ्जर्याः विषये एकादश टीकानां उल्लेखः प्राप्यतेः। तदनुसारं भांडाकरप्राच्यविद्यासंशोधनमन्दिरस्य विवरणपुस्तिकायाः अवलोकनेन टीकायाः विषयेक ज्ञानं प्राप्तम्।

- भानुदत्तकृता रसमञ्जर्याः संस्कृत-मराठी भाषानुवादः डॉ. प्रमोदः ग. लाळेवर्येणकृतः।
- रसमञ्जरीग्रन्थः शशीप्रभा इति हिन्दीव्याख्योपेता चौखम्बा विद्याभवनं वाराणसीद्वारा प्रकाशितास्ति।
- **सुरभिव्याख्याविभूषिता** कविशेखरः पण्डित श्रीबदरीनाथशर्मा निर्मिता श्रीहरिकृष्णनिबन्धभवनप्रकाशनं बनारसद्वारा प्रकाशितास्ति।
- बसोहली पेंटिंग्स ऑफ़ द रसमंजरी अभिनव प्रकाशन, नईदिल्लीद्वारा प्रकाशितास्ति।[८].
- **व्यङ्ग्यार्थकौमुदी अनन्तपण्डित**द्वारा रचिता तथा प्रकाशटीका **नागेशभट्ट** विरचिता बनारससंस्कृतसीरीजद्वारा प्रकाशिते स्तः।
- **समञ्जसाटीका** श्रीविश्वेश्वरद्वारा रचिता तथा सुखावबोधटीका जनार्दनपाण्डेयद्वारा विरचिता सम्पुर्णानन्दसंस्कृतविश्वविद्यालयद्वारा प्रकाशितास्ति।[9]

विविधविश्वविद्यालयानां ग्रन्थालयानाम् अवलोकनं कृतम्।

अन्तर्जालमाध्यमेन संशोधनविषयसम्बधितानां प्रकाशितानां हस्तलिखितानाम् अवलोकनं कृतम्।

- कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य ग्रन्थालय।
- केन्द्रियसंस्कृतविश्वविद्यालयस्यग्रन्थालयः।
- राष्ट्रीयसंस्कृतविश्वविद्यालयस्य ग्रन्थालयः।

अधोलिखितानि अन्तर्जालियस्रोतांसि हस्तलिखितान्वेषणाय अनुसन्धात्रा गवेषितानि।

- **अन्तर्जालीयस्रोतांसि –**
  - www.shodhganga.ac.in
  - www.shodhgangotri.ac.in
  - https://www.worldcat.org/

एवमाहत्य पूर्वसंशोधने न क्वापि रसमञ्जरीपरिमलस्य पाठसम्पादनमध्ययनं वा सञ्जातमिति अवगत्य विषयोऽयं संशोधनाय स्वीकृतः।

प्राक्कल्पना –

- रसमञ्जरीपरिमलस्य समीक्षात्मकं सम्पादनम्।
- रसमञ्जरीपरिमलटीकायाः ज्ञानं रसमञ्जरीग्रन्थस्य अवबोधनाय उपयुक्तं वर्तते।

व्याप्तिः मर्यादा च –

हस्तलिखितेषु कालानुक्रमेण विभाजनं कृत्वा समीक्षाणात्मकमध्ययनेन विषय-भाषा-प्रतिपादनं च इत्यादिनां घटकानां विचारः क्रियते।

रसमञ्जर्याः प्राप्तासु टीकासु रसमञ्जरीपरिमलटीकायाः हस्तलिखितानां पाठसम्पादनम् अत्र क्रियते।

प्रकरणविभागः -

उपोद्घातः

प्रथमं प्रकरणम् –

- हस्तलिखितशास्त्रपरिचयः तथा रसमञ्जरीपरिचयः।

- हस्तलिखितशास्त्रपरिचयः
- रसमञ्जरीपरिचयः
- ग्रन्थकारपरिचयः
- ग्रन्थवैशिष्ट्याणि

द्वितीयं प्रकरणम्–

- रसमञ्जरीपरिमलस्य परिचयः, हस्तलिखितविवरणञ्च।

- रसमञ्जरीपरिमलपरिचयः
- टीकाकारपरिचयः
- मातृकापरिचयः
- अनुसृता सम्पादनपद्धतिः

तृतीयं प्रकरणम् –

- हस्तलिखितपाठसम्पादनम्।

चतुर्थं प्रकरणम्-

- रसमञ्जरीपरिमलस्य साहित्यिकं समीक्षणम्।

- नायिकाभेदप्रभेदः
- नायकभेदप्रभेद
- रसनिरूपणम्
- टीकायाः वैशिष्ट्यानि

पञ्चमं प्रकरणम्-

- अन्यासां टीकानाम् अध्ययनम्।

निष्कर्षः उपसंहारश्च

<u>सन्दर्भसूची –</u>

1. राजशेखरः, काव्यमीमांसा, द्वितीयोऽध्यायः,पेज.१२
2. राजशेखरः, काव्यमीमांसा, द्वितीयोऽध्यायः,पेज.११
3. रसमञ्जरी, भानुदत्तमिश्रः, चौखम्बा विद्याभवन भूमिक- पे.११
4. Descriptive Catalogue BORI Vol 12 (Alankara Sangita & Natya)
5. डॉ.प्रमोदः ग.लाळे, रसमञ्जरी, संस्कृत-मराठी,अनुवादक.
6. भानुदत्तः,रसमञ्जरी, चौखम्बा विद्याभवन भूमिका –पेज.२०
7. भानुदत्तः,रसमञ्जरी, चौखम्बा विद्याभवन भूमिका –पेज.२०
8. भारतीय संस्कृति, चौखम्बा विद्याभवन पेज -४५
9. भानुदत्तः,रसमञ्जरी, चौखम्बा विद्याभवन भूमिका –पेज.२०

<u>सन्दर्भग्रन्थसूची –</u>

- डॉ. कृष्णकुमारमिश्रः, रसमञ्जरी, चौखम्बा विद्याभवन-२०११
- राजशेखर, काव्यमीमांसा, चौखम्बा विद्याभवन २०१७
- आ. मम्मट, काव्यप्रकाश, चौखम्बा विद्याभवन २०१९
- डॉ.प्रमोद ग लाळे, रसमञ्जरी. 2013

- आ.बलदेव उपाध्याय, संस्कृत साहित्य का बृहत इतिहास खण्ड ८
- डॉ.रामजी उपाध्याय, कवि और महाकवि, चौखम्बा विद्याभवन १९९५
- आ.बलदेव उपाध्याय, संस्कृत साहित्य का इतिहास शारदा निकेतन,वाराणसी २००१
- Descriptive Catalogue BORI Vol 12 (Alankara Sangita & Natya) १९३६

मार्गदर्शकः

प्रो. परागः जोशी

संस्कृतभाषा-साहित्यविभागः

विभागाध्यक्ष – आधुनिकभाषाविभागः

संचालक – शास्त्रविद्यागुरुकुलम्

शोधकर्ता

जिनेन्द्रः जम्बूः भिलवडे